शुद्धब्रह्मपरात्पर राम ॥१॥

कालात्मकपरमेश्वर राम ॥२॥

शेषतल्पसुखनिद्रित राम ॥३॥

ब्रह्माद्यामरप्रार्थित राम ॥४॥

राम राम जय राजा राम ।

राम राम जय सीता राम ।

चण्डकिरणकुलमण्डन राम ॥५॥

श्रीमद्दशरथनन्दन राम ॥६॥

कौसल्यासुखवर्धन राम ॥७॥

विश्वामित्रप्रियधन राम ॥८॥

राम राम जय राजा राम ।

राम राम जय सीता राम ।

घोरताटकाघातक राम ॥९॥

मारीचादिनिपातक राम ॥१०॥

कौशिकमखसंरक्षक राम ॥११॥

श्रीमदहल्योद्धारक राम ॥१२॥

राम राम जय राजा राम ।

राम राम जय सीता राम ।

गौतममुनिसंपूजित राम ॥१३॥

सुरमुनिवरगणसंस्तुत राम ॥१४॥

नाविकधावितमृदुपद राम ॥१५॥

www.yousigma.com

मिथिलापुरजनमोहक राम ॥१६॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
विदेहमानसरञ्जक राम ॥१७॥
त्र्यंबककार्मुकभञ्जक राम ॥१८॥
सीतार्पितवरमालिक राम ॥१९॥
कृतवैवाहिककौतुक राम ॥२०॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
भार्गवदर्पविनाशक राम ॥२१॥
श्रीमदयोध्यापालक राम ॥२२॥
॥ अयोध्याकाण्डम ॥
अगणितगुणगणभूषित राम ॥२३॥
अवनीतनयाकामित राम ॥२४॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
राकाचन्द्रसमानन राम ॥२५॥
पितृवाक्याश्रितकानन राम ॥२६॥
प्रियगुहविनिवेदितपद राम ॥२७॥
तत्क्षालितनिजमृदुपद राम ॥२८॥
राम राम जय राजा राम ।

www.yousigma.com

राम राम जय सीता राम ।
भरद्वाजमुखानन्दक राम ॥२९॥
चित्रकूटाद्रिनिकेतन राम ॥३०॥
दशरथसन्ततचिन्तित राम ॥३१॥
कैकेयीतनयार्थित राम ॥३२॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
विरचितनिजपितृकर्मक राम ॥३३॥
भरतार्पितनिजपादुक राम ॥३४॥
॥ अरण्यकाण्डम ॥
दण्डकवनजनपावन राम ॥३५॥
दुष्टविराधविनाशन राम ॥३६॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
शरभङ्गसुतीक्ष्णार्चित राम ॥३७॥
अगस्त्यानुग्रहवर्धित राम ॥३८॥
गृध्राधिपसंसेवित राम ॥३९॥
पञ्चवटीतटसुस्थित राम ॥४०॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
शूर्पणखार्तिविधायक राम ॥४१॥

www.yousigma.com

खरदूषणमुखसूदक राम ॥४२॥

सीताप्रियहरिणानुग राम ॥४३॥

मारीचार्तिकृदाशुग राम ॥४४॥

राम राम जय राजा राम ।

राम राम जय सीता राम ।

विनष्टसीतान्वेषक राम ॥४५॥

गृध्राधिपगतिदायक राम ॥४६॥

शबरीदत्तफलाशन राम ॥४७॥

कबन्धबाहुच्छेदक राम ॥४८॥

राम राम जय राजा राम ।

राम राम जय सीता राम ।

॥ किष्किन्धाकाण्डम ॥

हनुमत्सेवितनिजपद राम ॥४९॥

नतसुग्रीवाभीष्टद राम ॥५०॥

गर्वितवालिसंहारक राम ॥५१॥

वानरदूतप्रेषक राम ॥५२॥

राम राम जय राजा राम ।

राम राम जय सीता राम ।

हितकरलक्ष्मणसंयुत राम ॥५३॥

॥ सुन्दरकाण्डम ॥

कपिवरसन्ततसंस्मृत राम ॥५४॥

www.yousigma.com

तद्गतिविघ्नध्वंसक राम ॥५५॥
सीताप्राणाधारक राम ॥५६॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
दुष्टदशाननदूषित राम ॥५७॥
शिष्टहनूमद्भूषित राम ॥५८॥
सीतावेदितकाकावन राम ॥५९॥
कृतचूडामणिदर्शन राम ॥६०॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
कपिवरवचनाश्वासित राम ॥६१॥

## ॥ युध्दकाण्डम ॥

रावणनिधनप्रस्थित राम ॥६२॥
वानरसैन्यसमावृत राम ॥६३॥
शोषितसरिदीशार्थित राम ॥६४॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
विभीषणाभयदायक राम ॥६५॥
पर्वतसेतुनिबन्धक राम ॥६६॥
कुम्भकर्णशिरच्छेदक राम ॥६७॥
राक्षससङ्घविमर्दक राम ॥६८॥

www.yousigma.com

राम राम जय राजा राम ।
राम राम जय सीता राम ।
अहिमहिरावणचारण राम ॥६९॥
संहृतदशमुखरावण राम ॥७०॥
विधिभवमुखसुरसंस्तुत राम ॥७१॥
खस्थितदशरथवीक्षित राम ॥७२॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
सीतादर्शनमोदित राम ॥७३॥
अभिषिक्तविभीषणनत राम ॥७४॥
पुष्पकयानारोहण राम ॥७५॥
भरद्वाजादिनिषेवण राम ॥७६॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
भरतप्राणप्रियकर राम ॥७७॥
साकेतपुरीभूषण राम ॥७८॥
सकलस्वीयसमानत राम ॥७९॥
रत्नलसत्पीठास्थित राम ॥८०॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
पट्टाभिषेकालंकृत राम ॥८१॥

www.yousigma.com

पार्थिवकुलसम्मानित राम ॥८२॥
विभीषणार्पितरङ्गक राम ॥८३॥
कीशकुलानुग्रहकर राम ॥८४॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
सकलजीवसंरक्षक राम ॥८५॥
समस्तलोकाधारक राम ॥८६॥

## ॥ उत्तरकाण्डम ॥

आगतमुनिगणसंस्तुत राम ॥८७॥
विश्रुतदशकण्ठोद्भव राम ॥८८॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
सीतालिङ्गननिर्वृत राम ॥८९॥
नीतिसुरक्षितजनपद राम ॥९०॥
विपिनत्याजितजनकज राम ॥९१॥
कारितलवणासुरवध राम ॥९२॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
स्वर्गतशम्बुकसंस्तुत राम ॥९३॥
स्वतनयकुशलवनन्दित राम ॥९४॥
अश्वमेधक्रतुदीक्षित राम ॥९५॥

www.yousigma.com

कालावेदितसुरपद राम ॥९६॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
आयोध्यकजनमुक्तिद राम ॥९७॥
विधिमुखविबुधानन्दक राम ॥९८॥
तेजोमयनिजरूपक राम ॥९९॥
संसृतिबन्धविमोचक राम ॥१००॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
धर्मस्थापनतत्पर राम ॥१०१॥
भक्तिपरायणमुक्तिद राम ॥१०२॥
सर्वचराचरपालक राम ॥१०३॥
सर्वभवामयवारक राम ॥१०४॥
राम राम जय राजा राम ।
राम राम जय सीता राम ।
वैकुण्ठालयसंस्थित राम ॥१०५॥
नित्यानन्दपदस्थित राम ॥१०६॥
राम राम जय जय राजा राम ॥१०७॥
राम राम जय जय सीता राम ॥१०८॥

www.yousigma.com